## खण्ड – II

## भाषा – I

## संस्कृत

अत्र **त्रिंशत्** प्रश्नाः सन्ति ।

**सर्वे** प्रश्नाः समाधेयाः ।

निम्नलिखित अपठितं गद्यांशम् आधारीकृत्य प्रश्नाः **( 31 - 36 )** समाधेयाः –

अपरस्मिन् दिवसे शिक्षकः रामानुजम् अतर्जयत् । तत्पश्चात् सः गणितविषयस्य कक्षां कदापि न त्यक्तवान् परीक्षापरिणामे च शतप्रतिशतम् अङ्कान् गणितविषये प्राप्तवान् । प्रार्थनासभायामपि शिक्षकः तद् वृत्तान्तं सर्वेभ्यः छात्रेभ्यः श्रावितवान् । पुनश्चोक्तवान् – "एषः बालकः एतस्य विद्यालयस्य महान् विद्यार्थी भविष्यति ।" रामानुजोऽपि पूर्णसामर्थ्येन अध्ययने संलग्नोऽभूत् । कालान्तरे सः महान् गणितज्ञोऽभवत् ।

31. 'रामानुजम्' इत्यत्र कः सन्धिः ?
    (A) यण् सन्धि
    (B) दीर्घ सन्धिः
    (C) गुण सन्धिः
    (D) अयादि सन्धिः

32. 'त्यक्तवान्' इत्यत्र प्रत्ययः अस्तिः –
    (A) वतुप्
    (B) मतुप्
    (C) क्तवतु
    (D) शानच्

33. 'परीक्षापरिणामे' इत्यत्र समासविग्रहः वर्तते –
    (A) परीक्षया परिणामे
    (B) परीक्षायाः परिणामे
    (C) परीक्षयाः परिणामे
    (D) परीक्षायां परिणामे

34. 'शतप्रतिशतम् अङ्कान् गणितविषये प्राप्तवान् ।' अस्मिन् वाक्ये बहुवचनान्तं पदं किम् अस्ति ?
    (A) शतप्रतिशतम्
    (B) अङ्कान्
    (C) गणित विषये
    (D) प्राप्तवान्

35. 'सभायाम्' इत्यत्र का विभक्तिः ?
    (A) द्वितीया
    (B) चतुर्थी
    (C) षष्ठी
    (D) सप्तमी

36. माहेश्वर सूत्रेषु यण् प्रत्याहारस्य उचितक्रमः अस्ति –
    (A) य व र ल
    (B) य र ल व
    (C) य ल र व
    (D) य ल व र



www.MDSmartClasses.com
Scanned with CamScanner

निम्नलिखितम् अपठितं गद्यांशम् आधारीकृत्य अधोलिखिताः प्रश्नाः ( 37 - 42 ) समाधेयाः –

सूर्यनगरीरूपेण प्रसिद्धं जोधपुरनगरमपि ऐतिहासिकं महत्त्वं धारयति । मारवाडराज्यस्य राजधानीरूपेण प्रसिद्धेऽस्मिन् नगरे मेहरानगढदुर्गः, राजस्थानस्य ताजमहलरूपेण प्रसिद्धं जसवन्तथडा नामकं स्थानं, कायलानाकासारः, मण्डोरोद्यानं च इत्यादीनि स्थलानि सन्ति । वीरशिरोमणेः प्रतापस्य मातुलगृहं पालीनगरमेवास्ति । पालीजनपदे परशुराममहादेवस्य मन्दिरं, स्थापत्यदृष्ट्या विश्वप्रसिद्धं रणकपुरजैनमन्दिरम् अपि विद्यते ।

37. "इत्यादीनि स्थलानि सन्ति" । रेखांकितं क्रियापदं लङ्लकारे भवति –

(A) आसीत् (B) आसन्

(C) आसनम् (D) आस्ताम्

38. "मन्दिरम्" इत्यत्र किं लिङ्गम् ?

(A) पुंल्लिंगम् (B) स्त्रीलिंगम्

(C) नपुंसकलिंगम् (D) सर्वलिंगम्

39. "स्थापत्यदृष्ट्या विश्वप्रसिद्धं रणकपुरजैनमन्दिरं विद्यते" । अत्र रेखांकितपदे वचनम् अस्ति –

(A) एकवचनम् (B) द्विवचनम्

(C) बहुवचनम् (D) सर्ववचनम्

40. 'अप्रसिद्धम्' इत्यस्य विलोमपदः अस्ति

(A) असिद्धम् (B) सुसिद्धम्

(C) प्रसितम् (D) प्रसिद्धम्

41. 'रणकपुर जैनमन्दिरमपि विद्यते' । अत्र रेखाङ्किते पदे लकारः अस्ति –

(A) लङ् लकारः (B) लट् लकारः

(C) लृट् लकारः (D) लोट् लकारः

42. ऐतिहासिकं महत्त्वं धारयति । अत्र रेखाङ्किते पदे धातुः अस्ति –

(A) धृष् (B) धारि

(C) धृ (D) धर

43. 1000 इत्येषा संख्या अस्ति

(A) कोटिः (B) अर्बुदम्

(C) खर्वम् (D) सहस्रम्



www.MDSmartClasses.com

Scanned with CamScanner

44. शुद्धवाक्यम् अस्ति –
(A) नदीभ्यो गंगा श्रेष्ठा
(B) नदीषु गंगा श्रेष्ठा
(C) नदीभ्यां गंगा श्रेष्ठा
(D) नदीभिः गंगा श्रेष्ठा

45. "एकः काकः <u>महावृक्षे</u> पत्न्या सह वसति ।"
अत्र रेखाङ्कितपदम् अधिकृत्य प्रश्नम् अस्ति –
(A) महावृक्षे पत्न्या सह कः वसति ?
(B) काकः महावृक्षे कया सह वसति ?
(C) काकः पत्न्या सह कुत्र वसति ?
(D) काकः पत्न्या सह किं करोति ?

46. 'हितं ............. च दुर्लभं वचः ।' समुचित पदेन रिक्तस्थानं पूरयत –
(A) मनोहारि
(B) मनोयुक्तम्
(C) मनसहितम्
(D) मनोहारी

47. माहेश्वर सूत्राणि सन्ति –
(A) पञ्चदश
(B) चतुर्दश
(C) सप्तदश
(D) द्वादश

48. अधोलिखितेषु एकवचनस्य रूपमस्ति –
(A) मनांसि
(B) मनसी
(C) शस्त्राणि
(D) शिरसि

49. 'विमुक्तः' इत्यस्य पदस्य विलोमपदमस्ति –
(A) युद्ध
(B) उद्विग्नम्
(C) आवद्धः
(D) पक्षतः

50. "शिक्षिका बालिका को पुस्तक देती है" अस्य वाक्यस्य संस्कृतानुवादः भविष्यति –
(A) शिक्षिका बालिकायै पुस्तकं ददाति
(B) शिक्षिका बालिकाय पुस्तकं ददाति
(C) शिक्षिका बालिकां पुस्तकम् ददाति
(D) शिक्षिका बालिकया पुस्तकम् ददाति

51. वागरूपं भावप्रकटनं केन कौशलेन सम्भवति ?
(A) श्रवण कौशलेन
(B) भाषण कौशलेन
(C) पठन कौशलेन
(D) लेखन कौशलेन

52. कस्यां पद्धत्यां अध्यापकः सर्वं वाचा वदति, छात्राः स्वबुद्ध्या झटिति विषयान् गृह्णन्ति ?
(A) समाहार विधिः
(B) आगमन-निगमन विधिः
(C) अन्वय-व्यतिरेक विधिः
(D) वार्तालाप विधिः



www.MDSmartClasses.com
Scanned with CamScanner

53. संस्कृतभाषाशिक्षणस्य स्वाभाविकः क्रमः अस्ति –

(A) श्रवणं, पठनं, लेखनं, भाषणं
(B) भाषणं, श्रवणं, पठनं, लेखनं
(C) श्रवणं, भाषणं, पठनं, लेखनं
(D) पठनं, श्रवणं, लेखनं, भाषणं

54. सम्भाषणशिविराणाम् आयोजने संस्कृत भाषा-शिक्षणस्य कः सिद्धान्त स्वीक्रियते ?

(A) एकता-सहभागितायाः सिद्धान्तः
(B) भावनात्मक-अभिव्यक्तेः सिद्धान्तः
(C) स्वाभाविकतायाः सिद्धान्तः
(D) पठनाभ्यासस्य सिद्धान्तः

55. निम्नलिखिंतेषु दृश्य-श्रव्य साधनमस्ति –

(A) पाठ्यपुस्तकम्
(B) दूरदर्शनम्
(C) ग्रामोफोन
(D) श्यामपट्टः

56. निम्नलिखितेषु मौखिकपरीक्षा अस्ति –

(A) शलाकापरीक्षा
(B) निबन्धरूपपरीक्षा
(C) कथालेखनपरीक्षा
(D) श्लोकलेखनपरीक्षा

57. निम्नलिखितेषु लिखितपरीक्षायाः प्रकारः वर्तते –

(A) साक्षात्कारः
(B) अन्त्याक्षरी
(C) निबन्धरूपपरीक्षा
(D) शलाकापरीक्षा

58. अधोलिखितेषु वस्तुनिष्ठपरीक्षायाः प्रकारः नास्ति –

(A) बहुसमाधानप्रश्नाः
(B) रिक्तस्थानपूरणम्
(C) सत्यासत्यनिर्णयः
(D) लघूत्तरात्मकप्रश्नाः

59. "शिक्षकः छात्रस्य न्यूनतां विज्ञाय तस्य परिमार्जनं करोति ।" तदा शिक्षकः अत्र कस्य शिक्षणस्य प्रयोगं करोति ?

(A) निदानात्मकशिक्षणस्य
(B) उपचारात्मकशिक्षणस्य
(C) उभयोः (A) एवं (B)
(D) सूक्ष्मशिक्षणस्य

60. 'सर्वे अध्यापकाः छात्रस्य व्यवहारम् आचरणम् अध्ययनञ्च परीक्ष्य स्व स्वाभिमतम् अङ्करूपेण लिखन्ति । छात्रः सर्वदा अध्यापकस्य निरीक्षणे भवति ।' अस्यां प्रक्रियायां छात्रस्य मूल्याङ्कनं भवति –

(A) सामयिकमूल्याङ्कनम्
(B) वार्षिकमूल्याङ्कनम्
(C) सततमूल्याङ्कनम्
(D) मौखिकमूल्याङ्कनम्



www.MDSmartClasses.com
Scanned with CamScanner